Reprinted from the Annals of Oriental Research of the University of Madras Volume XXIV Part II, 1973,

DHVANYĀLOKASAṄGRAHA

TNSDA
08262

BY
Dr. K. KUNJUNNI RAJA

8262

Price Re. 1-00

DHVANYĀLOKA SAṄGRAHA

Edited with an English Translation and Notes

BY

Dr. K. KUNJUNNI RAJA

Professor and Head of the Department of Sanskrit

UNIVERSITY OF MADRAS

1973

091.94812
KUN

தொல் பொருள் … நூலகம்-சென்னை
எண் 8262
தேதி 20.3.87

INTRODUCTION

The *Dhvanyālokasaṅgraha* edited here for the first time on the basis of a unique manuscript preserved in the Government Manuscripts Library, Madras (R. 3396b) is a short metrical work giving a brilliant and succint topical analysis of the *Kārikās* and *vṛtti* of the *Dhvanyāloka*, mainly following the *Locana* commentary of Abhinavagupta. The available portion of the *Saṅgraha* covers the first two Uddyotas; it is a metrical commentary in Anuṣṭubh Kārikās and contains 48 and 57 verses for the first and second chapters respectively. The Government Manuscripts Library contains only a paper transcript, in Devanāgarī script prepared in 1920–21, of an original Malayalam palm leaf manuscript belonging to my wife's family – Paliyam family in Chandamangalam, Kerala. The entire Paliyam collection of manuscripts is now in the University Manuscripts Library, Trivandrum; but I have not been able to trace the original manuscript. The transcript is carefully written, and I have been able to get the correct text without much difficulty. The significant variant readings in the manuscript have been noted at the end.

Though called *Dhvanyālokasaṅgraha* the work gives many of the vital points given by Abhinavagupta in the *Locana*. Nothing definite is known about the author of the *Saṅgraha*; the reference to *Īśāna* in the beginning suggests that his teacher's name was *Īśāna*. The *Saṅgraha* is found at the end of an anonymous commentary on the *Locana*; it is possible, though not certain, that the two works are by the same author.

The name *Dhvanyālokasaṅgraha* shows that Ānandavardhana's famous work on Dhvani was also known by the term *Dhvanyāloka*, even though Abhinavagupta refers to it as *Kāvyāloka* and *Sahṛdayāloka* and many manuscripts are found referring to it as *Sahṛdayāloka* or *Sahṛdayahṛdayāloka*. The commentary

on the *Locana* found in the same codex also refers to the text as Dhvanyāloka :

अथ ध्वन्यालोकलोचनव्याख्याप्रारम्भः ।

Following Abhinavagupta's *Locana* the author of the *Saṅgraha* also distinguishes the Kārikākāra from the Vṛttikāra; since this could be explained as based on the functional difference between the two, it does not stand in the way of assuming their personal identity. In the *Abhinavabhāratī* written after the *Locana*, Abhinavagupta quotes both the *Kārikās* and passages from the *Vṛtti* as by the same author, Ānandavardhana.

" एतदेवोपजीव्यानन्दवर्धनाचार्येणोक्तम् सुप्तिङ्वचनेत्यादि ।"

(ch. XIV) cf. *Dh. Ā* III. 16. (2)

एतमेवार्थं सम्यगानन्दवर्धनाचार्योऽपि विविच्य न्यरूपयत् " समीक्ष्य विनिवेशितो रूपकादिरलंकारवर्ग " इत्युपक्रमेण

" विवक्षा तत्परत्वेन नाङ्गित्वेन कदाचन ।
काले च ग्रहणत्यागौ नातिनिर्वहणैषिता ॥ "

इत्यादिना ग्रन्थसन्दर्भेण सोदाहरणेन । तच्चास्माभिः सहृदयालोकलोचने तद्विवरणे विस्तरतो व्याख्यातम् ।

(Q. by A. Sankaran in *Rasa* and *Dhvani*, p. 51)

Indian tradition beginning from Mahimabhaṭṭa, Kuntaka, Abhinavagupta and Kṣemendra unanimously identifies the Kārikākāra with the Vṛttikāra.

Ānandavardhana was a well known poet, philosopher and literary critic with several works to his credit. His *Devīśataka*, a devotional poem using Śabdacitra is quoted in the *Dhvanyāloka*. The *Viṣamabāṇalīlā* is a Prākrit poem in Gāthās; this is also quoted in *Dhvanyāloka*. His *Arjunacarita* is a Sanskrit poem referred to in the *Dhvanyāloka* and quoted by Abhinavagupta in

the *Locana* (p. 388). He has written a subcommentary on Dharmottara's commentary on Dharmakīrti's *Pramāṇavārttika.* (referred to in *Locana,* p. 529). The *Tattvāloka* is a work on Advaita philosophy referred to in *Locana* (p. 67).

तदुत्तीर्णत्वे तु सर्वं परमेश्वराद्वयो ब्रह्मेत्यस्मच्छास्त्रकारेण न न विदितं तत्त्वालोकग्रन्थं विरचयतेत्यास्ताम् । cf. also. p. 533.

In literary criticism his greatest work is the *Dhvanyāloka,* both Kārikās and the *Vṛtti.* Of these works the *Devīśataka* is published in *Kāvyamālā* IX (1–31). This and the *Dhvanyāloka* alone remain extant.

The *Dhvanyāloka* was first published in *Kāvyamālā* series with Abhinavagupta's *Locana* commentary for the first three *Uddyotas.* Pattabhirama Sastri's edition in the Chowkhamba Series with *Locana* commentary and the *Bālapriyā* Subcommentary is perhaps the best edition available. (The references here are to this edition). The edition in the Kuppuswami Sastri Research Institute contains Udaya Raja's scholarly subcommentary *Kaumudī,* but only for the first Uddyota. Jacobi translated the text into German in *ZDMG* (lvi–lvii). K. Krishnamoorthy's English translation is well known.

The present text throws light on many of the important problems connected with the theory of Dhvani, mainly following the lead given by Abhinavagupta. I have added an English translation and brief notes to enable students to follow the text intelligently.

My thanks are due to Prof. R. N. Sampath, Curator, Madras Government Oriental Manuscripts Library, for the loan of the unique manuscript, to Prof. E. R. Sreekrishna Sarma for valuable suggestions, and to my colleagues and students for assistance in correcting the proofs and preparing the index.

K. KUNJUNNI RAJA

CONTENTS

		PAGES
Introduction	...	iii — v
Dhvanyālokasaṅgraha		
UDDYOTA I	...	1 — 5
UDDYOTA II	...	6 — 11
Dhvanikārikā		
UDDYOTA I	...	12 — 14
UDDYOTA II	...	15 — 17
English Translation		
CHAPTER I	...	18 — 23
CHAPTER II	...	23 — 29
Notes		
CHAPTER I	...	30 — 32
CHAPTER II	...	32 — 35
Variant Readings	...	36
Index of Half Verses	...	37 — 40

ध्वन्यालोकसंग्रहः

—:*:—

प्रथमोद्योतः

प्रणम्य गुरुमीशानं, श्रवणानुगुणक्रमम् ।
तीर्थं व्यङ्ग्यामृताम्भोधेः करोमि ध्वनिसंग्रहम् ॥ 1 ॥

स्वयं कृतार्थो व्याख्यातृश्रोतृणामिष्टसिद्धये ।
आदावीश्वरसौमुख्यमाशिषाकृत वृत्तिकृत् ॥ 2 ॥

व्यङ्ग्येऽथ व्यापृतौ काव्ये तथा शब्दार्थयोर्ध्वनिः ।
ध्वन्यते ध्वननं यत्र ध्वनतीति प्रसर्पति ॥ 3 ॥

अस्मिन् विमतयः पूर्वं सन्त्यभावभ्रमोत्थिताः ।
शोभाहेतुरयं नैव गुणालंकारतः परः ॥ 4 ॥

परो गुणालंकारेभ्यो न शोभाहेतुरित्यपि ।
शोभाहेतुरपि प्रायस्तुच्छत्वान्नादरास्पदम् ॥ 5 ॥

एवं विमतयस्तिस्रः प्रथमं भ्रमकल्पिताः ।
केचिद् विवेक्तुमप्रौढा भाक्तमाख्यान्ति संशयात् ॥ 6 ॥

लक्षणाशक्तितः केचिद् वेद्य एवेति मन्वते ।
पञ्चानां विमतीनां या निवृत्तिस्तत्त्वबोधिनी ॥ 7 ॥

तत्प्रयोजनमेतस्य प्रीतिः सहृदयाश्रिता ।
बोध्यबोधकभावादिसंबन्धोऽनुक्तितः स्फुटः ॥ 8 ॥

इत्याद्यभिप्राययुता ध्वनिकारेण धीमता ।
चिकीर्षितप्रतिज्ञायां स्थापिता पूर्वकारिका ॥ 9 ॥

आरब्धलक्षणस्याथ ध्वनेर्बध्नाति पीठिकाम् ।
द्वितीयया कारिकया वाच्यव्यङ्ग्यौ समं पठन् ॥ 10 ॥

अपोद्धृत्य ततो वाच्यं शरीरत्वाद् विलक्षणम् ।
पूर्वैर्लक्षितपूर्वत्वादङ्गत्वेनाभिषिञ्चति ॥ 11 ॥

अथास्तित्वानुमानेन भानाद् दृष्टान्तपूर्वकम् ।
वाच्याद्व्यतिरिक्तत्वं ध्वेनरस्य समर्थितम् ॥ 12 ॥

अतो विधिनिषेधादिरूपभेदात् समर्थिता ।
तथा विषयभेदाच्च वाच्यध्वन्योः स्फुटा भिदा ॥ 13 ॥

इतिहासमुखेनास्य सारत्वं चास्तितान्वयि ।
प्रसाध्य व्यङ्ग्यसद्भावे प्रमाणान्तरमीरितम् ॥ 14 ॥

यतः सहृदयैरेव वेद्यते तद् बहुश्रुतैः ।
अतोऽधिकारिभेदेन सत्त्वोज्जीविता पुनः ॥ 15 ॥

एवं सत्तां प्रसाध्याथ प्राधान्यमपि साध्यते ।
व्यङ्ग्यावलम्बनेनैव महत्वं स्यात् कवेरिति ॥ 16 ॥

प्रतीयमानो द्विविधो लौकिकः काव्यमात्रजः ।
लौकिको द्विविधस्तत्र वस्तु विध्यादिरूपतः ॥ 17 ॥

भूतपूवतया कश्चिदलंकाराख्ययोदितः ।
काव्यव्यापारजनितो रसादिर्वाच्यतां जहत् ॥ 18 ॥

इति स्वरूपं त्रिविधं सोदाहरणमीरितम् ।
व्यङ्ग्यव्यञ्जकभूयिष्ठनिबन्धननिबन्धनम् ॥ 19 ॥

महाकवित्वमित्युक्त्या प्राधान्यमपि साधितम् ।
प्राधान्येऽस्य पुरस्ताद् यद् वाच्यवाचकसंग्रहः ॥ 20 ॥

'तदुपायतये' त्येतत् सदृष्टान्तं स्फुटीकृतम् ।
पद्वाक्यार्थपर्वादिक्रमाक्रमणजश्रमः ॥ 21 ॥

नास्मिन् प्रतीतिझाटित्यादिति सौभाग्यमीरितम् ।
एवं सत्तासाधुभावमहत्त्वपरिशोभितम् ॥ 22 ॥

सद्भावं प्रतिपाद्यास्य लक्षणीयत्वसिद्धये ।
तमर्थमित्यादिवाक्ये कर्मता विनियोजिता ॥ 23 ॥

असाधारणधर्मस्य प्रतिपादनपूर्वकम् ।
विमतीनां व्युदासेन लक्ष्मास्यादौ निरूपितम् ॥ 24 ॥

व्यञ्जकत्वे प्रधानत्वात् पृथग्वादोऽर्थशब्दयोः ।
द्वयोरपेक्षानैयत्याद् 'व्यङ्क्त' इत्यपृथग् वचः ॥ 25 ॥

उपसर्जनतारीत्या स्वार्थयोरर्थशब्दयोः ।
अङ्गत्वेऽङ्गाश्रयाणां तु व्यतिरेकः स्फुटीकृतः ॥ 26 ॥

वक्त्रादिसाचिव्यबलाद् द्व्यर्थनात्र द्वयोरपि ।
व्यङ्ग्यस्याङ्गित्वनिर्वाहे स्फुटो व्यापार ईरितः ॥ 27 ॥

अलंकारादिधर्मास्तच्छरीराः कथमात्मनः ।
अपह्नवेऽनिह्नवेऽस्य सौभाग्यस्यास्थिराः क्षमाः ॥ 28 ॥

समासोक्त्यादिषु व्यङ्ग्यमापाते यद्यपि स्फुटम् ।
स्वयं वाच्यमुपस्कर्तुं धावत्येवात्मतां जहत् ॥ 29 ॥

सोदाहरणमुक्त्वेति पुनराक्षेपचिन्तनम् ।
विशेषोक्तिविशेषस्य कथनावधि विस्तृतम् ॥ 30 ॥

पर्यायोक्ते यदि पुनर्वाच्याद् व्यङ्ग्ये चमत्कृतिः ।
ध्वनिता तस्य नान्यस्य व्याप्तस्यैतत् स्वरूपता ॥ 31 ॥

इति प्रसाध्य व्यङ्ग्यस्य समावेशोऽपि सर्वतः ।
अलंकारेष्वनात्मत्वं सोदाहृति निरूपितम् ॥ 32 ॥

विशेषशब्देनैवास्य निःसामान्यत्वमीरितम् ।
अतः पूर्वप्रसिद्धानामङ्गतैवात्र संगता ॥ 33 ॥

वाच्यवाचकचारुत्वपरिक्षीणायुषां कथम् ।
व्यङ्ग्यव्यञ्जकसंबन्धसारे ध्वनिपथे गतिः ॥ 34 ॥

इत्याक्षिप्याथ वक्तॄणां प्रामाण्यमहिमोच्यते ।
यथाकथंचित् स्वातन्त्र्यान्नैषा संज्ञा प्रवर्तिता ॥ 35 ॥

क्षणप्रध्वंसिवर्णानामन्त्यवर्णावलम्बिनाम् ।
स्फोटस्यैतत्प्रकाश्यस्य व्यापारस्यापि शाब्दिकैः ॥ 36 ॥

ध्वनिसंज्ञा कृता पूर्वं तन्मतस्थैस्तु सूरिभिः ।
न्यायानुसरणादेषा पञ्चकेऽपि प्रवर्तिता ॥ 37 ॥

अविवक्षितवाच्यस्य द्विभेदस्य परस्य च ।
अलक्ष्यलक्ष्यक्रमताभेदेन द्विविधस्थितौ ॥ 38 ॥

तदवान्तरभेदैश्च महाविषयगाहिनः ।
लक्षणीयत्वमुचितमनल्पस्येति साधनात् ॥ 39 ॥

अभाववादं निर्मूलमुन्मूल्यैतत्स्पृहावताम् ।
उद्योगयोग्यतामुक्त्वा भाक्तवादो निरूप्यते ॥ 40 ॥

धर्मः सेव्योऽभिधेयेन सारूप्यादिर्यथोदितः ।
गुणवृत्तेश्च शब्दस्य भागस्तैक्ष्ण्यादिरेव च ॥ 41 ॥

श्रद्धा च प्रतिपाद्येऽर्थे भङ्गो मुख्यार्थसंश्रयः ।
भक्तिस्तदागतश्चार्थो भाक्तो लाक्षणिकस्तथा ॥ 42 ॥

गौणस्तद्रूपता चास्य भिन्नरूपतया कथम् ।
यत्र यत्र ध्वनिस्तत्र लक्षणा न प्रवर्तते ॥ 43 ॥

उपलक्षणतैवास्याः प्रवृत्तावपि कुत्रचित् ।
तृतीयकक्ष्यावस्थानाद् भेदमात्रोपलक्षणात् ॥ 44 ॥

अव्याप्त्यतिव्याप्तिकृताद् दोषादेषा न लक्षणा ।
चतुर्थकक्ष्यादीक्षायां व्यञ्जनस्य फलं प्रति ॥ 45 ॥

अगतिस्खलनाच्छब्दे कात्र भाक्तत्वसंगतिः ।
अभावभेदनिर्भेदाल्लक्षणीयत्वसाधनात् ॥ 46 ॥

भाक्तत्वासंगतेर्लक्ष्मसामान्यं कारिकोदितम् ।
विवृतं वृत्तिकारेण तस्यायं संग्रहः कृतः ॥ 47 ॥

इति प्रथमोद्योतसंग्रहः ।

द्वितीयोद्योतः

अथानुत्सूत्रमाख्यातुं विशेषान् वृत्तिकृत् पुरः ।
अनूद्य स्वोक्तिमाख्याति संगतिं कारिकाश्रयाम् ॥ 1 ॥

अविवक्षितवाच्यस्य ध्वनेर्भेदे विवक्षिते ।
तद्दिगुन्मीलनायादौ वाच्यभेदः प्रकाशितः ॥ 2 ॥

अत एव निरुक्त्यैव नाम्नो लक्षणसंग्रहात् ।
उदाहरणकक्ष्यायां भेदयोर्दत्तवान् पदम् ॥ 3 ॥

पूर्वत्रानुपयोगेन परत्रानुपपत्तितः ।
अविवक्षितवाच्यत्वं लक्षणामूलता द्वयोः ॥ 4 ॥

वाच्यातिशयरूपं च ध्वनेः सामान्यलक्षणम् ।
पूर्वयोरविवक्षातः परप्रेक्षितयान्ययोः ॥ 5 ॥

विवक्षा चान्यपरता विरुद्धे इति चेन्न तु ।
यतोऽन्यपरमेवेदं वाच्यरूपं विवक्षितम् ॥ 6 ॥

कोऽप्यलक्ष्यक्रमव्यङ्ग्य इति नामैव लक्षणम् ।
लक्ष्यव्यङ्ग्यक्रम इति परस्यापि प्रभेददिक् ॥ 7 ॥

वृत्तिरीतिगुणच्छन्दोलंकारादिनिबन्धनम् ।
रसैकतत्परं यत्र स ध्वनेर्विषयो महान् ॥ 8 ॥

इति प्रसाध्य रसवदलंकारो निरूप्यते ।
रसालंकारयोर्भेदं नहि जानन्ति केचन ॥ 9 ॥

अचेतनाश्रयं केचिदलंकारं रसं विदुः ।
यत्राङ्गत्वं रसादीनां वाक्यार्थान्तरगौरवात् ॥ 10 ॥

अलंकारान्तरवता संकरेणान्यथापि वा ।
असौ रसवदादीनां मार्गो यत्राङ्गिता परः ॥ 11 ॥

सोदाहरणमित्येवं प्रसाध्य स्वमतात्मना ।
प्रतिष्ठितेऽङ्गिन्यङ्गानां संबन्धे भेद उच्यते ॥ 12 ॥

गुणास्तत्रात्मनो धर्मा वस्तुतः समवायिनः ।
शौर्यादिवच्छरीरेषु उपचारेण कल्पिताः ॥ 13 ॥

अङ्गसङ्गादलंकाराः क्रमादात्मोपकारिणः ।
विविच्यैवं गुणानां तु प्रसिद्धां दशभेदताम् ॥ 14 ॥

उक्तान्तर्भावदोषत्वतत्त्यागाश्रयतः परम् ।
निरस्य रससंबन्धे नियमः परिकीर्तितः ॥ 15 ॥

माधुर्यौजःप्रसादानामङ्गोपचरितात्मनाम् ।
शृङ्गारकरुणालम्बि माधुर्यं, वीरसंश्रयम् ॥
ओजः, प्रसादः सर्वेषु रसेषु विहितस्थितिः ॥ 16 ॥

श्रुतिदुष्टादिदोषाणामनित्यानामनित्यता ।
अस्मदुक्तनयेनैव ध्वनौ वर्ज्यतया स्फुटा ॥ 17 ॥

एवं रसादिराम्नातो ह्यसंलक्ष्यक्रमोदयः ।
प्रभेदानामसंख्यत्वादेक एव निरूपितः ॥ 18 ॥

संभोगविप्रलम्भाभ्यां शृङ्गारो द्विविधोऽग्रतः ।
स्वस्वीयभेदैरङ्गानां बहूनां संकरोत्थितैः ॥ 19 ॥

देशकालादिभेदैश्च न परिच्छेदमर्हति ।
तथा रसान्तरादीनामियत्ता का भिदाश्रया ॥ 20 ॥

इति प्रसङ्गेनाङ्गानां पर्यायेणात्मसेविनाम् ।
बहिरङ्गान्तरङ्गाणां संग्रहे वक्ष्यते ॥ 21 ॥

गुणानां समवायित्वान्न पृथक्त्वे न रूपणम् ।
अङ्गद्वारोपकारेऽपि कादाचित्कं निबन्धनम् ॥ 22 ॥

अलंकारेषु विषममन्यूनानतिरेकवत् ।
आदौ शृङ्गारभेदेषु सर्वेष्वेवाङ्गिषु स्फुटम् ॥ 23 ॥

दोषायैव न पोषार्थमनुप्रासोऽनुबन्धवान् ।
यमकादिनिबन्धोऽयं शृङ्गारे दुर्घटोऽङ्गिनि ॥ 24 ॥

विप्रलम्भे विशेषेण सौकुमार्यातिरेकतः ।
अन्तरङ्गो रूपकादिरपृथग्यत्नसाधितः ॥ 25 ॥

अनिर्व्यूढश्च पोषाय निर्व्यूढोऽप्यङ्गतां गतः ।
उदाहरणयुक्त्यैवं प्रत्युदाहरणैस्तथा । ॥ 26 ॥

अङ्गेष्वात्मभ्रमं छित्वा प्रोक्तोऽलक्ष्यक्रमो ध्वनिः ।
वाच्यस्य च विभावादे रसादेर्व्यङ्ग्यताजुषः ॥ 27 ॥

प्रदीपघटसाम्येन प्रतीतौ यद्यपि क्रमः ।
चर्वणोदयवेगेन न लक्ष्यश्चर्वणा पुनः ॥ 28 ॥

पृथक् पृथक् पानकवदपृथक्त्वेऽपि जायते ।
असंलक्ष्यक्रमव्यङ्ग्यो ध्वनिरेवं निरूपितः ॥ 29 ॥

वाच्यप्रतीतौ जातायां परापेक्षाबलात् क्रमात् ।
प्रतीतिरन्या सुभगा याति विश्रान्तिधामताम् ॥ 30 ॥

घण्टानुनादवत्तत्र शक्तेः परिणतिः स्फुटा ।
शब्दार्थशक्तिमूलत्वाद् द्विशाखः क्रमलक्षितः ॥ 31 ॥

विवक्षिते चान्यपरे वाच्ये भेदे दिगीदृशी ।
अपेक्षितोपक्षीणायामभिधायां तु वाचकः ॥ 32 ॥

शक्त्यन्तरेणालंकारमाक्षेप्तुं धावति स्वयम् ।
बह्वर्थवाचिनैवेयमभिधा लक्षणापि न ॥ 33 ॥

विवक्षासाम्यशब्दोक्त्यभावे व्यञ्जनमेव तत् ।
तत्रौपम्यं कल्पनीयमसंबद्धार्थयोर्द्वयोः ॥ 34 ॥

युक्तिरेषोपमाव्यङ्ग्ये विरोधादिष्वयं नयः ।
शब्दशक्त्यनुवादात्मा ध्वनिरेवं प्रकाशितः ॥ 35 ॥

द्वेधा व्यवस्थितस्यास्य प्रोक्तभेदात् पुनः पुनः ।
तत्रार्थः स्वस्य सामर्थ्याद् गुणीकृतनिजस्थितिः ॥ 36 ॥

एतत्प्रकाशकं शब्दं विनैवार्थान्तरं प्रति ।
व्यञ्जकः कथितः सोऽयमर्थशक्त्युद्भवो ध्वनिः ॥ 37 ॥

अशब्दवाच्यो व्यर्थोऽयं शब्देनोन्मीलनात् पुनः ।
व्यङ्ग्यकक्ष्यां न गाहेत गूढे यस्माच्चमत्कृतिः ॥ 38 ॥

एवं सामान्यलक्ष्मोक्त्वा तत्प्रभेदः प्रकाश्यते ।
न केवलं ध्वनेर्द्वित्वं व्यञ्जकस्यापि कल्पते ॥ 39 ॥

बहिःसत्तामनादृत्य कविप्रौढोक्तिमात्रतः ।
एकोऽन्यस्तन्निबन्धस्य वक्तुरित्येव भेददिक् ॥ 40 ॥

एकस्यान्यो बहिस्सत्तामौचित्येनावलम्बते ।
अर्थशक्त्यनुनादे तु विशेषोऽन्यः प्रकाश्यते ॥ 41 ॥

व्यङ्ग्यस्यालंकारतायां वैचित्र्यं द्विगुणं भवेत् ।
इदं नास्माभिरेवोक्तं पूर्वैर्विस्तारितं यतः ॥ 42 ॥

वाच्यस्यातत्परत्वे तु नालंकारध्वनिर्भवेत् ।
गुणीभावेन तत्रायं वाच्योपस्कारको यतः ॥ 43 ॥

प्रतीतिमात्रेऽलंकारो वाच्यालंकारपोषकः ।
वाच्यस्य तत्परत्वे स्यादलंकारध्वनिस्थितिः ॥ 44 ॥

एवं विविच्यालंकारनामभिर्ध्वनयः पुनः ।
भूतपूर्वतया भूयः सोदाहृति निरूपिताः ॥ 45 ॥

शरीरपोषकाणामप्यात्मत्वेन निबन्धने ।
वस्तुमात्रादलंकारे शोभोत्कर्षः प्रयोजकः ॥ 46 ॥

तेषामेव व्यञ्जकत्वे चारुता कापि दृश्यते ।
चारुत्वोत्कर्षमूलैव सर्वस्यापि प्रधानता ॥ 47 ॥

वाच्यस्यान्यत्र संक्रान्तेस्तथान्यत्र तिरस्कृतेः ।
अविवक्षितवाच्यस्य द्विशाखत्वमुदीरितम् ॥ 48 ॥

अलक्ष्यलक्ष्यक्रमतो भेदयोरन्यनिष्ठयोः ।
असंख्येयत्वतः पूर्वमेक एव निरूपितम् ॥ 49 ॥

लक्ष्यव्यङ्ग्यक्रमे भेदे शब्दशक्त्या प्रकाशितः ।
आक्षिप्त एवालंकारः कैश्चिद् वस्त्वपि कल्पितम् ॥ 50 ॥

'न केवलं वस्तुमात्र'मिति वृत्त्यनुसारतः ।
शब्दार्थोभयमिश्रेऽपि भेदस्तद्वन्निरूपितः ॥ 51 ॥

कवेः कविनिबद्धस्य प्रौढोक्त्या संभवी स्वतः ।
व्यञ्जकोऽर्थो वस्तुरूपस्तथालंकारतां गतः ॥ 52 ॥

वस्त्वलंकाररूपेण व्यङ्ग्योऽर्थोऽपि द्विधा स्थितः ।
वस्तुना वस्त्वलंकारावलंकारेण तावुभौ ।
व्यङ्ग्याविति प्रभेदानां व्याप्तिः पश्चात् करिष्यते ॥ 53 ॥

इत्येवं ध्वनिलक्ष्मोक्त्वा तदाभासो निरूप्यते ।
आन्तमेकप्रकारेण कोऽप्यर्थो नावभासते ॥ 54 ॥

अतः स्फुटास्फुटतया प्रतीतौ स्फुटतोदये ।
ध्वनिरन्यो गुणीभूतव्यङ्ग्यकक्ष्यां विगाहते ॥ 55 ॥

अविवक्षितवाच्येऽपि लक्षणामूलता यतः ।
तत्प्रयोजनकक्ष्यायां व्यङ्ग्यत्वमिति सेत्स्यति ॥ 56 ॥

अव्युत्पत्तेरशक्तेर्वा कष्टकल्पनया पुनः ।
निबन्धने तूपचारमात्रान्नैव ध्वनिस्थितिः ॥ 57 ॥

अतः सर्वत्र दोषाणां निरासे यत्नमास्थितः ।
महाकविर्निबध्नीयादिति लक्षणसंग्रहः ॥ 58 ॥

इति द्वितीयोद्योतसंग्रहः ।

ध्वनिकारिका

—:*:—

प्रथमोद्योतः

काव्यस्यात्मा ध्वनिरिति बुधैर्यः समाम्नातपूर्व-
स्तस्याभावं जगदुरपरे भाक्तमाहुस्तमन्ये ।
केचिद् वाचां स्थितमविषये तत्त्वमूचुस्तदीयं
तेन ब्रूमः सहृदयमनःप्रीतये तत्स्वरूपम् ॥ 1 ॥

अर्थः सहृदयश्लाघ्यः काव्यात्मा यो व्यवस्थितः ।
वाच्यप्रतीयमानाख्यौ तस्य भेदावुभौ स्मृतौ ॥ 2 ॥

तत्र वाच्यः प्रसिद्धो यः प्रकारैरुपमादिभिः ।
बहुधा व्याकृतः सोऽन्यैस्ततो नेह प्रतन्यते ॥ 3 ॥

प्रतीयमानं पुनरन्यदेव वस्त्वस्ति वाणीषु महाकवीनाम् ।
यत्तत्प्रसिद्धावयवातिरिक्तं विभाति लावण्यमिवाङ्गनासु ॥ 4 ॥

काव्यस्यात्मा स एवार्थस्तथा चादिकवेः पुरा ।
क्रौञ्चद्वन्द्ववियोगोत्थः शोकः श्लोकत्वमागतः ॥ 5 ॥

सरस्वती स्वादु तदर्थवस्तु
निःष्यन्दमाना महतां कवीनाम् ।
अलोकसामान्यमभिव्यनक्ति
परिस्फुरन्तं प्रतिभाविशेषम् ॥ 6 ॥

शब्दार्थशासनज्ञानमात्रेणैव न वेद्यते ।
वेद्यते स तु काव्यार्थतत्त्वज्ञैरेव केवलम् ॥ 7 ॥

सोऽर्थस्तद्व्यक्तिसामर्थ्ययोगी शब्दश्च कश्चन ।
यत्नतः प्रत्यभिज्ञेयौ तौ शब्दार्थौ महाकवेः ॥ 8 ॥

आलोकार्थी यथा दीपशिखायां यत्नवान् जनः ।
तदुपायतया तद्वदर्थे वाच्ये तदादृतः ॥ 9 ॥

यथा पदार्थद्वारेण वाक्यार्थः संप्रतीयते ।
वाच्यार्थपूर्विका तद्वत् प्रतिपत् तस्य वस्तुनः ॥ 10 ॥

स्वसामर्थ्यवशेनैव वाक्यार्थं प्रतिपादयन् ।
यथा व्यापारनिष्पत्तौ पदार्थो न विभाव्यते ॥ 11 ॥

तद्वत् सचेतसां सोऽर्थो वाच्यार्थविमुखात्मनाम् ।
बुद्धौ तत्त्वार्थदर्शिन्यां झटित्येवावभासते ॥ 12 ॥

यत्रार्थः शब्दो वा तमर्थमुपसर्जनीकृतस्वार्थौ ।
व्यङ्क्तः काव्यविशेषः स ध्वनिरिति सूरिभिः कथितः ॥ 13 ॥

व्यङ्ग्यस्य यत्राप्राधान्यं वाच्यमात्रानुयायिनः ।
समासोक्त्याद्यस्तत्र वाच्यालंकृतयः स्फुटाः ॥ 14 ॥

व्यङ्ग्यस्य प्रतिभामात्रे वाच्यार्थानुगमेऽपि वा ।
न ध्वनिर्यत्र वा तस्य प्राधान्यं न प्रतीयते ॥ 15 ॥

तत्परावेव शब्दार्थौ यत्र व्यङ्ग्यं प्रति स्थितौ ।
ध्वनेः स एव विषयो मन्तव्यः संकरोज्झितः ॥ 16 ॥

भक्त्या बिभर्ति नैकत्वं रूपभेदादयं ध्वनिः ।
अतिव्याप्तेरथाव्याप्तेर्न चासौ लक्ष्यते तथा ॥ 17 ॥

उक्त्यन्तरेणाशक्यं यत् तच्चारुत्वं प्रकाशयन् ।
शब्दो व्यञ्जकतां बिभ्रद् ध्वन्युक्तेर्विषयी भवेत् ॥ 18 ॥

रूढा ये विषयेऽन्यत्र शब्दाः स्वविषयादपि ।
लावण्याद्याः प्रयुक्तास्ते न भवन्ति पदं ध्वनेः ॥ 19 ॥

मुख्यां वृत्तिं परित्यज्य गुणवृत्त्यार्थदर्शनम् ।
यदुद्दिश्य फलं तत्र शब्दो नैव स्खलद्गतिः ॥ 20 ॥

वाचकत्वाश्रयेणैव गुणवृत्तिर्व्यवस्थिता ।
व्यञ्जकत्वैकमूलस्य ध्वनेः स्याल्लक्षणं कथम् ॥ 21 ॥

कस्यचिद् ध्वनिभेदस्य सा तु स्यादुपलक्षणम् ।
लक्षणेऽन्यैः कृते चास्य पक्षसंसिद्धिरेव नः ॥ 22 ॥

इति प्रथमोद्योतः ।

द्वितीयोद्योतः ।

अर्थान्तरे संक्रमितमत्यन्तं वा तिरस्कृतम् ।
अविवक्षितवाच्यस्य ध्वनेर्वाच्यं द्विधा मतम् ॥ 1 ॥

असंलक्ष्यक्रमोद्योतः क्रमेण द्योतितः परः ।
विवक्षिताभिधेयस्य ध्वनेरात्मा द्विधा मतः ॥ 2 ॥

रसभावतदाभासतत्प्रशान्त्यादिरक्रमः ।
ध्वनेरात्माङ्गिभावेन भासमानो व्यवस्थितः ॥ 3 ॥

वाच्यवाचकचारुत्वहेतूनां विविधात्मनाम् ।
रसादिपरता यत्र स ध्वनेर्विषयो मतः ॥ 4 ॥

प्रधानेऽन्यत्र वाक्यार्थे यत्राङ्गं तु रसादयः ।
काव्ये तस्मिन्नलंकारो रसादिरिति मे मतिः ॥ 5 ॥

तमर्थमवलम्बन्ते येऽङ्गिनं ते गुणा स्मृताः ।
अङ्गाश्रितास्त्वलंकारा मन्तव्याः कटकादिवत् ॥ 6 ॥

शृङ्गार एव मधुरः परः प्रह्लादनो रसः ।
तन्मयं काव्यमाश्रित्य माधुर्यं प्रतितिष्ठति ॥ 7 ॥

शृङ्गारे विप्रलम्भाख्ये करुणे च प्रकर्षवत् ।
माधुर्यमार्द्रतां याति यतस्तत्राधिकं मनः ॥ 8 ॥

रौद्रादयो रसा दीप्त्या लक्ष्यन्ते काव्यवर्तिनः ।
तद्व्यक्तिहेतू शब्दार्थावाश्रित्योजो व्यवस्थितम् ॥ 9 ॥

समर्पकत्वं काव्यस्य यत्तु सर्वरसान् प्रति ।
स प्रसादो गुणो ज्ञेयः सर्वसाधारणक्रियः ॥ 10 ॥

श्रुतिदुष्टादयो दोषा अनित्या ये च दर्शिताः ।
ध्वन्यात्मन्येव शृङ्गारे ते हेया इत्युदाहृताः ॥ 11 ॥

तस्याङ्गानां प्रभेदा ये प्रभेदाः स्वगताश्च ये ।
तेषामानन्त्यमन्योन्यसंबन्धपरिकल्पने ॥ 12 ॥

दिङ्मात्रं तूच्यते येन व्युत्पन्नानां सचेतसाम् ।
बुद्धिरासादितालोका सर्वत्रैव भविष्यति ॥ 13 ॥

शृङ्गारस्याङ्गिनो यत्नादेकरूपानुबन्धवान् ।
सर्वेष्वेव प्रभेदेषु नानुप्रासः प्रकाशकः ॥ 14 ॥

ध्वन्यात्मभूते शृङ्गारे यमकादिनिबन्धनम् ।
शक्तावपि प्रमादित्वं विप्रलम्भे विशेषतः ॥ 15 ॥

रसाक्षिप्ततया यस्य बन्धः शक्यक्रियो भवेत् ।
अपृथग्यत्ननिर्वर्त्यः सोऽलंकारो ध्वनौ मतः ॥ 16 ॥

ध्वन्यात्मभूते शृङ्गारे समीक्ष्य विनिवेशितः ।
रूपकादिरलंकारवर्ग एति यथार्थताम् ॥ 17 ॥

विवक्षा तत्परत्वेन नाङ्गित्वेन कदाचन ।
काले च ग्रहणत्यागौ नातिनिर्वहणैषिता ॥ 18 ॥

निर्व्यूढावपि चाङ्गत्वे यत्नेन प्रत्यवेक्षणम् ।
रूपकादिरलंकारवर्गस्याङ्गत्वसाधनम् ॥ 19 ॥

क्रमेण प्रतिभात्यात्मा योऽस्यानुस्वानसंनिभः ।
शब्दार्थशक्तिमूलत्वात् सोऽपि द्वेधा व्यवस्थितः ॥ 20 ॥

आक्षिप्त एवालंकारः शब्दशक्त्या प्रकाशते ।
यस्मिन्ननुक्तः शब्देन शब्दशक्त्युद्भवो हि सः ॥ 21 ॥

अर्थशक्त्युद्भवस्त्वन्यो यत्रार्थः स प्रकाशते ।
यस्तात्पर्येण वस्त्वन्यद् व्यनक्त्युक्तिं विना स्वतः ॥ 22 ॥

शब्दार्थशक्त्याक्षिप्तोऽपि व्यङ्ग्योऽर्थः कविना पुनः ।
यत्राविष्क्रियते स्वोक्त्या सान्यैवालंकृतिर्ध्वनेः ॥ 23 ॥

प्रौढोक्तिमात्रनिष्पन्नशरीरः संभवी स्वतः ।
अर्थोऽपि द्विविधो ज्ञेयो वस्तुनोऽन्यस्य दीपकः ॥ 24 ॥

अर्थशक्तेरलंकारो यत्राप्यन्यः प्रतीयते ।
अनुस्वानोपमव्यङ्ग्यः स प्रकारोऽपरो ध्वनेः ॥ 25 ॥

रूपकादिरलंकारवर्गो यो वाच्यतां श्रितः ।
स सर्वो गम्यमानत्वं बिभ्रद् भूम्ना प्रदर्शितः ॥ 26 ॥

अलंकारान्तरस्यापि प्रतीतौ यत्र भासते ।
तत्परत्वं न वाच्यस्य नासौ मार्गो ध्वनेर्मतः ॥ 27 ॥

शरीरीकरणं येषां वाच्यत्वे न व्यवस्थितम् ।
तेऽलंकाराः परां छायां यान्ति ध्वन्यङ्गतां गताः ॥ 28 ॥

व्यज्यन्ते वस्तुमात्रेण यदालंकृतयस्तदा ।
ध्रुवं ध्वन्यङ्गता तासां काव्यवृत्तिस्तदाश्रया ॥ 29 ॥

अलंकारान्तरव्यङ्ग्यभावे ध्वन्यङ्गता भवेत् ।
चारुत्वोत्कर्षतो व्यङ्ग्यप्राधान्यं यदि लक्ष्यते ॥ 30 ॥

यत्र प्रतीयमानोऽर्थः प्रम्लिष्टत्वेन भासते ।
वाच्यस्याङ्गतया वापि नास्यासौ गोचरो ध्वनेः ॥ 31 ॥

अव्युत्पत्तेरशक्तेर्वा निबन्धो यः स्खलद्गतेः ।
शब्दस्य स च न ज्ञेयः सूरिभिर्विषयो ध्वनेः ॥ 32 ॥

सर्वेष्वेव प्रभेदेषु स्फुटत्वेनावभासनम् ।
यद् व्यङ्ग्यस्याङ्गिभूतस्य तत् पूर्णं ध्वनिलक्षणम् ॥ 33 ॥

—: * :—

TRANSLATION

An Epitome of the Dhvanyāloka

Chapter I

1. After making obeisance to my teacher Īśāna, I am preparing a summary of the Dhvani (text) in a manner suitable for learning, as stairs for descent into the ocean of the nectar of suggestion.

2. By the benedictory verse in the beginning, the author of the Vṛtti, who is already satisfied (after performing obeisance to God), calls for the favour of God in accomplishing the desires of the commentators and readers.

3. The term *Dhvani* may mean the suggested sense, the function of suggestion, the poem (containing a suggested sense), the expression or the literal meaning (as the suggestor), since it can be interpreted as 'that which is suggested,' 'the function of suggestion,' 'that where there is suggestion' and 'that which suggests.'

4. In this case there are differing views based on the mistaken notion of the absence (of Dhvani): (1) It is not a cause of aesthetic beauty since it is distinct from Guṇa and Alaṅkāra.

5. (2) Anything other than Guṇa, Alaṅkāra etc. cannot be a cause of aesthetic beauty, and (3) Even if it is a cause of aesthetic beauty, it is minor and does not deserve (special) consideration.

6. Thus there are at first three disagreeing views based on the mistaken notion. Some others who are not capable of discrimination consider Dhvani as based on Bhakti or Lakṣaṇā, due to uncertainty.

7. Some others, because of their incapacity for giving a definition, consider it as something to be experienced. The removal of these five disagreeing views is by explaining the real nature (of Dhvani).

8. The purpose of this (explanation) is the aesthetic pleasure on the part of the Sahṛdayas; the relation regarding the teacher and the taught is clear though not expressed.

9. With ideas such as these the wise author of the Dhvani text gives the initial verse to indicate what is intended to be done.

10. Then by the second Kārikā, which reads together the literal and the suggested meanings, he lays the foundation for the intended definition.

11. Taking out the literal sense (out of these two), separately since it is like the body (of poetry) it is kept as subordinate as it has already been defined by earlier writers.

12. Then inferring the existence of the suggested sense since it appears (distinct from the beauty of the parts), its distinction from the literal sense is established with the help of examples.

13. Thus by the difference in form (between the literal and suggested meanings), one being positive while the other is negative etc., and by the difference in the scope (between the two), the clear distinction between the literal and suggested senses is established.

14. Then through the episode in the epic (of the *Rāmāyaṇa*), the existence (and importance) of this (suggested sense) is established; and another argument in favour of the existence of the suggested sense is given.

15. As it (Dhvani) is understood only by the well-read and experienced Sahṛdayas, the existence of the suggested sense is again established, on the basis of the difference in the persons who can appreciate the literal sense and those who can appreciate the suggested sense.

16. Thus establishing the existence (of Dhvani), its importance is also established by saying that the greatness of a poet is based on his resorting to the suggested sense.

17. The suggested sense is of two kinds, the ordinary and that found only in literature. The ordinary (worldly type) is again of two varieties; of these the idea (Vastu) is in the form of affirmation, negation etc.,

18. The other is called by the term *Alaṁkāra* (figure of speech) *Dhvani*, since formerly it was called by that term *Alaṅkāra* (when it was expressed). The Rasa etc., can be produced only through literature and cannot be directly expressed.

19. - 20. Thus the threefold form (of Dhvani) is stated with illustrations. Then by saying that the greatness of a poet is based on his composing works full of suggested elements, the importance of Dhvani is brought out. Though 'Dhvani' is the predominant thing, the literal meaning and the expression are accepted 'as a means for it'. This is made clear with illustrations.

21. Here (in the suggested sense) there is no special effort (needed) in understanding through stages, the word meaning first and then the sentence meaning etc., because of the quickness in the understanding of the two. Thus the charm of Dhvani is pointed out.

22. - 23. Thus after dealing with the *sadbhāva* of Dhvani which refers to its existence, excellence and importance, for establishing the existence of what is to be defined, it is introduced in the objective case in the sentence '*tam artham*' (Kārikā 13) of the definition.

24. After setting forth the special characteristic (of Dhvani), its definition is given first to reject the opposing views.

25. The terms *artha* (literal meaning) and *śabda* (the expression) are given separately (in the definition), since they are important in the suggestion (separately); but since the two are invariably together, the term *Vyaṅktaḥ* (in the dual number) is used (in the definition) keeping them together.

26. The terms *sva* and *artha*, applied to *artha* and *śabda* respectively, and being kept subordinate (as given in the definition) make clear the distinction (of Dhvani) from those (Guṇa, Alaṅkāra etc.) which depend only on the limbs of poetry.

27. Here by the two meanings (literal and suggested) got on the strength of the contextual factors like the speaker etc., the function of both *śabda* and *artha* in making the suggested sense predominant is made clear.

8262

28. Qualities like Alaṅkāra are embodied in *śabda* and *artha* and are occasional (not invariably connected with poetry); how can they be capable of revealing its charm, if its soul itself is non-existent ?

29. Though in (figures of speech like) Samāsokti etc. the existence of the suggested sense is quite clear and obvious, this sense gives up its importance and acts on its own accord to embellish the literal sense.

30. Explaining thus with illustrations, the figure of speech Ākṣepa is discussed and the description is elaborated till the consideration of the varieties of Viśeṣokti.

31. If the suggested sense is more charming than the literal sense in Paryāyokta, then it may be included in Dhvani; Dhvani, which has a wider scope cannot be identified with this Alaṅkāra.

32. After establishing this, it is shown with examples that even when suggested ideas are introduced in some Alaṅkāras, these suggested elements cannot by any means be taken as the soul.

33. By the term '*viśeṣa*' (in the expression '*Kāvyaviśeṣaḥ*' of the definition) the extraordinary nature of this (Dhvani) is indicated. Hence it is proper to give a subordinate place to the elements (like Alaṅkāra) previously well known (to earlier writers).

34. How can those people, whose life is spent in (looking for) the beauty of the literal meaning and the expression, move on the path of Dhvani whose essense is based on the relation of the suggestor and the suggested ?

35. Thus rejecting (the critics of Dhvani), the authority for the speakers in favour of (Dhvani) is stated. This term (Dhvani) is not somehow made arbitrarily.

36—37. The grammarians have given the term Dhvani previously to (1) the letters which are destroyed soon after they

are produced, (2) to that which depends on the last letter, (3) also to the Sphoṭa, (4) to the meaning which is revealed by the Sphoṭa and also (5) to the function (of revelation); and wise men (Sahṛdayas) who accept their views use the term (Dhvani) to all the five things, following the same principle.

38. To the two kinds of Avivakṣitavācya (dhvani) and also (the two kinds) of the other (Vivakṣitānyaparavācya dhvani), there are two subdivisions as Asaṁlakṣyakramavyaṅgya (where the order of sequence between the literal and suggested meanings is imperceptible) and Saṁlakṣyakramavyaṅgya (where the order of sequence is perceptible).

39. With further subdivisions, this great topic is of very wide scope and it is proper that it should be defined.

40. Establishing this and completely rejecting the arguments for the absence of Dhvani, and stating that it is worthy of pursuit by those interested, the Bhāktavāda (theory including Dhvani under Bhakti or Lakṣaṇā) is taken for discussion.

41—42. *Bhakti* means (1) qualities like similarity etc. considered to exist in the literal meaning; (2) *Bhāga* or part of the qualities like sharpness, known through the secondary Gauṇī Vṛtti (metaphor based on common quality); (3) *śraddhā* or concentration on the intended meaning, and (4) *Bhaṅga* or break or incongruity of the primary meaning. The meaning got through that (Bhakti) is called *Bhākta* and includes meanings got through Lakṣaṇāvṛtti and Gauṇīvṛtti.

43. How can Dhvani be of the form of Gauṇīvṛtti, since the two are different in form? Lakṣaṇā does not function in all cases of Dhvani.

44. Even when it (Lakṣaṇā) functions in some cases (of Dhvani), it has only the function of indication, since it remains on the third stage and indicates the difference only.

45. Here this (Dhvani) is not Lakṣaṇā because of the defects of *Avyāpti* (underpervasion) and *Ativyāpti* (over-pervasion).

